# Kashimahatmye Jnanavapiprashamsakathanam

# કાશીમાહાત્મ્યે જ્ઞાનવાપીપ્રશંસાકથનમ્

## Document Information

Text title : Kashimahatmye Jnanavapiprashamsakathanam

File name : kAshImAhAtmyejnAnavApIprashaMsAkathanam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 6 | 1-83||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશીમાહાત્મ્યે જ્ઞાનવાપીપ્રશંસાકથનમ્

- શિવપાર્વતીસંવાદે -
શ્રીપાર્વત્યુવાચ -
શિવ કલ્યાણદ શ્રીમન્ સર્વજ્ઞામિતવિક્રમ ।
જ્ઞાનવાપીતિ સંજ્ઞેયમસ્યાઃ કથમભૂદ્વદ ॥ ૧॥

શ્રીશિવ ઉવાચ -
ત્રિશૂલાગ્રેણ સુભગે સા વાપિ ખનિતા પુરા ।
આપાતાલં જલં તત્ર તિષ્ઠત્યતિમનોહરમ્ ॥ ૨॥

કાશ્મીરમણિભિઃ શુભ્રૈઃ પુષ્પરાગૈર્મનોહરૈઃ ।
રત્નૈરન્યૈશ્ચ વિવિધૈર્બદ્ધા સા તદનન્તરમ્ ॥ ૩॥

તત્રાદ્ભુતં સમભવદ્ધેમપદ્મં વરાનને ।
વિચિત્રગન્ધસમ્બદ્ધં શતયોજનમાયતમ્ ॥ ૪॥

સહસ્રદલસંસક્તં કેસરાગરુરઞ્જિતમ્ ।
તત્સુગન્ધેન નિર્ગન્ધં સુગન્ધમભવજ્જલમ્ ॥ ૫॥

તત્પ્રાન્તકલ્પતરવસ્તત્સુગન્ધસમન્વિતાઃ ।
સ્વતઃ સુગન્ધા ઇવ તે ભાન્તિ નિત્યં વરાનને ॥ ૬॥

તત્પદ્મમકરન્દેન સંયુતં રાજતે જલમ્ ।
તત્તિરસ્કૃતપીયૂષં સુરાણામપિ દુર્લભમ્ ॥ ૭॥

સદા વિકાસમાપન્નં સદા પ્રેક્ષ્યમનુત્તમમ્ ।
કદાચિદપિ તન્મલાનં ન ભવત્યેવ સર્વદા ॥ ૮॥

કનત્કનકનાલાઢ્યં તદ્ધેમકમલં શુભમ્ ।
હેમચ્છત્રમિવાભાતિ કાશ્યાઃ કમલલોચને ॥ ૯॥

તત્કર્ણિકામધ્યદેશે સુન્દરે મૃદુલે સદા ।

કદાચિલ્લીલયા સમ્યગુવિશ્ય વસામ્યમ્ ॥ ૧૦॥

સંવિષ્ટસ્તત્ર (ષ્ટે તન્ત્ર) મામેકા કદાચિદ્વવર્ણિની ।
સ્તુત્વા તુ બહુધા સ્તોત્રૈઃ સમ્પૂજ્ય વિધિપૂર્વકમ્ ॥ ૧૧॥

કૃતાઞ્જલિપુટા તસ્થૌ પીનવક્ષોજભાસુરા ।
વિદ્યુલ્લતેવ વિમલા કમલામલલોચના ॥ ૧૨॥

તતો મયૈવ સા પૃષ્ટા કાસિ ત્વમસિ (મિતિ) સા તતઃ ।
ઉવાચ વચનં ચારુ સર્વલોકહિતાવહમ્ ॥ ૧૩॥

શઙ્કરાહમિહ સ્વામિન્નેતત્તીર્થાધિદેવતા ।
મત્પ્રાર્થિતં વરં દેહિ વરદાનવિચક્ષણ ॥ ૧૪॥

ઇદં જલં મહાદેવ શૈવો યઃ પાતુમિચ્છતિ ।
તસ્ય ત્વચઞ્ચલા ભક્તિસ્ત્વયિ તત્ત્વમતિસ્તથા ॥ ૧૫॥

જ્ઞાનવાપીતિ મન્નામ પ્રસિદ્ધં ભવતુ પ્રભો ।
સર્વપાપક્ષયકરં જલં ભવતુ સર્વદા ॥ ૧૬॥

ઇતિ સમ્પ્રાર્થ્ય (ર્થિતં) તત્સમ્યક્ તથા લેકેષ્ટસિદ્ધયે ।
તદ્યાચિતં વરં દત્વા તામાશ્વાસ્ય પુનઃ પુનઃ ॥ ૧૭॥

મયા તત્રૈવ સતતં સ્થીયતે વરવર્ણનિ ।
રોચતે વસતિસ્તત્ર કમલે ગન્ધસંવૃતે ॥ ૧૮॥

તાદૃશં તીર્થમમલં સર્વલોકેષુ દુર્લભમ્ ।
સ્નાનં કૃત્વા પ્રયત્નેન દ્વાદશીસોમવાસરે ॥ ૧૯॥

તત્ર દેવાનૃષીન્સમ્યક્ તર્પયિત્વા પિતૄનપિ ।
તજ્જલૈઃ સ્વાદુભિઃ સમ્યગ્જ્ઞાનેશમભિષિચ્ય ચ ॥ ૨૦॥

ગન્ધપુષ્પક્ષતાદ્યૈશ્ચ પૂજયિત્વા યથાવિધિ ।
પ્રદક્ષિણનમસ્કારૈરારાધ્ય તદનુજ્ઞયા ॥ ૨૧॥

મુક્ત્યર્થં ત્રિઃ પિબેત્સમ્યગ્જ્ઞાનેશસ્નાપનોદકમ્ ।
તત્તોયપાનમાત્રેણ શુદ્ધો ભવતિ માનવઃ ॥ ૨૨॥

તતસ્તદ્ધૃદયે શુદ્ધે જાયતે લિઙ્ગમુત્તમમ્ ।
અત એવ હિ તત્તીર્થં તીર્થોત્તમમિતિ શ્રુતમ્ ॥ ૨૩॥

તત્તીર્થરાજરક્ષાર્થં દણ્ડપાણિર્બલોન્નતઃ ।
મયા સંસ્થાપિતઃ શક્તસ્તત્તીરે વિમલે શુભે ॥ ૨૪॥

વિના તદાજ્ઞયા લોકે યેન કેનાપિ વા શુભે ।
સ્પ્રષ્ટું ન શક્યતે નૂનં તત્તીર્થં મુક્તિસાધનમ્ ॥ ૨૫॥

પુરા બ્રહ્માદિભિઃ સાકં વિષ્ણુઃ કાશીદિદૃક્ષયા ।
સમાયયૌ તતો દૃષ્ટ્વા દૂરાત્કાશીં મનોહરામ્ ॥ ૨૬॥

પ્રણમ્ય દણ્ડવદ્ભૂમૌ ભૂયોભૂયઃ કૃતાઞ્જલિઃ ।
અવાપ પરમાનન્દં દૃષ્ટા કાશીતિ સાદરમ્ ॥ ૨૭॥

ઇદમક્ષિયુગં ધન્યં પુણ્ડરીકનિભં શુભમ્ ।
યેન (યતઃ) શિવસ્વરૂપેયં કાશી દૃટા મયાઽધુના ॥ ૨૮॥

રત્નપઙ્કજસઙ્કાશાવિમો ધન્યૌ કરૌ મમ ।
યેન (યાભ્યાં) કાશી મયા પૂજ્યા મહેશસ્યાપરા તનૂઃ ॥ ૨૯॥

ઇદં ધન્યં શરીરં મે યેન કાશી શિવાત્મિકા ।
આલિઙ્ગનીયા યત્નેન સર્વપાપાપનોદિની ॥ ૩૦॥

ધન્યોઽસ્મ્યહં પુનીતોઽસ્મિ (સુપૂતોઽસ્મિ) ભાગ્યવાનસ્મિ સર્વદા ।
યતઃ શિવસ્વરૂપેયં કાશી સમ્પ્રાપિતા મયા ॥ ૩૧॥

મદન્યો ભાગ્યવાંલ્લોકે નાસ્તિ નાસ્ત્યેવ સર્વથા ।
યતો મોક્ષપ્રદા દિવ્યા કાશી સમ્પ્રાપિતા મયા ॥ ૩૨॥

કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ ન સંશયઃ ।
યતઃ સામ્બમયી કાશી પ્રાપ્યતે પુણ્યસંશ્રયાત્ ॥ ૩૩॥

મહદ્ભાગ્યં મહદ્ભાગ્યં મહદ્ભાગ્યં મયા ધુના ।
યતો મયા શિવાકારા કાશી સમ્પ્રાપ્યતે શિવા ॥ ૩૪॥

સકૃત્કાશીતિ નામૈવ સ્મૃત્વા પાતકિનઃ પુરા ।
શિવસારૂપ્યમાપન્નાઃ સા કાશી દૃશ્યતે મયા ॥ ૩૫॥

યસ્યાં સર્વેશ્વરઃ શમ્ભુઃ સામ્બઃ સંસારમોચકઃ ।
વસન્તિ (વસતિં) સર્વદા ચક્રે સા કાશી દૃશ્યતે મયા ॥ ૩૬॥

યસ્યાં વૈશ્વેશ્વરં જ્યોતિર્લિઙ્ગરૂપં સનાતનમ્ ।
નિવસત્યનિશં શ્રેષ્ઠં સા કાશી દૃશ્યતે મયા ॥ ૩૭॥

યસ્યામમ્બાસમેતઃ સન્ દિવ્યરૂપધરઃ શિવઃ ।
કરોતિ લીલામનિશં સા કાશી દૃશ્યતે મયા ॥ ૩૮॥

યસ્યાં જ્ઞાનપ્રદા નિત્યં જ્ઞાનવાપી મનોહરા ।
તિષ્ઠત્યમલકલ્લોલા સા કાશી દૃશ્યતે મયા ॥ ૩૯॥

યસ્યાં પૂર્ણેન્દુવદના પરમાન્નપ્રદાયિની ।
અન્નપૂર્ણા સ્થિતિં ચક્રે સા કાશી દૃશ્યતે મયા ॥ ૪૦॥

યસ્યાં તિષ્ઠતિ ઢુણ્ઢીશઃ સર્વેષ્ટફલદાયકઃ ।
સર્વવિઘ્નહરો નિત્યં સા કાશી દૃશ્યતે મયા ॥ ૪૧॥

યસ્યાં શિવરતો નિત્યં દણ્ડપાણિઃ શિવપ્રિયઃ ।
તિષ્ઠત્યતીવ સન્તુષ્ટઃ સા કાશી દૃશ્યતે મયા ॥ ૪૨॥

યસ્યાં સર્વેશ્વરઃ શ્રીમાન્ કરુણાનિધિરવ્યયઃ ।
ચકાર વસતિં નિત્યં સા કાશી દૃશ્યતે મયા ॥ ૪૩॥

યસ્યાં તિષ્ઠતિ વેદેડ્યઃ સદા પશુપતીશ્વરઃ ।
પશુપાશવિમોક્ષાય સા કાશી દૃશ્યતે મયા ॥ ૪૪॥

યસ્યાં તિષ્ઠતિ સર્વેષાં શાસ્તા શ્રીકાલભૈરવઃ ।
ભક્તકલ્પતરુઃ શ્રીમાન્ સા કાશી દૃશ્યતે મયા ॥ ૪૫॥

યસ્યામન્તર્ગૃહં નામ ક્ષેત્રં શિવમયં શિવમ્ ।
તિષ્ઠતિ શ્રીકરાવાસં સા કાશી દૃશ્યતે મયા ॥ ૪૬॥

યસ્યામસ્તિ વિશાલાક્ષી શિવસ્યાર્ધાઙ્ગભાગિની ।
ભક્તાભીષ્ટપ્રદા નિત્યં સા કાશી દૃશ્યતે મયા ॥ ૪૭॥

યસ્યાં ત્યક્તતનુર્મર્ત્યઃ શૈવઃ શિવપરાયણઃ ।
શિવાકારમવાપ્નોતિ સા કાશી દૃશ્યતે મયા ॥ ૪૮॥

યસ્યાં મોક્ષાર્થિનઃ શૈવાઃ નિરાહારાઃ શિવાર્ચકાઃ ।
નિવસન્ત્યનિશં શુદ્ધાઃ સા કાશી દૃશ્યતે મયા ॥ ૪૯॥

યસ્યાં પ્રાત્યહિકં કર્મ કૃત્વા તિષ્ઠન્તિ સાદરમ્ ।
પાપલેશવિહીનાશ્ચ સા કાશી દૃશ્યતે મયા ॥ ૫૦॥

યસ્યાઃ પ્રભાવં વેદાશ્ચ ન જાનન્ત્યેવ સર્વથા ।

કિમન્યાનિ પુરાણાનિ સા કાશી દૃશ્યતે મયા ॥ ૫૧॥

યયા તુલયિતું વસ્તુ નાસ્તિ બ્રહ્માણ્ડગોલકે ।
સર્વાર્તિનાશિની ધન્યા સા કાશી દૃશ્યતે મયા ॥ ૫૨॥

એવં વદંસ્તદા વિષ્ણુઃ કાશીનિકટમાદરાત્ ।
તતશ્ચક્રે પ્રણામાનિ (?) દણ્ડવત્સ પુનઃ પુનઃ ॥ ૫૩॥

તતો નાનાવિધૈઃ પુષ્પૈર્દિવ્યરત્નૈર્મનોહરૈઃ ।
નાનાવિધોપચારૈશ્ચ કાશીપૂજાં ચકાર સઃ ॥ ૫૪॥

તતો નાનાવિધાન્ ક્રૂરાન્કાશીસંરક્ષણા (કા)ન્ ગણાન્ ।
સમ્પૂજ્ય તદનુજ્ઞાતઃ કાશીમાવિશમ(દ)મ્બિકે ॥ ૫૫॥

તતઃ સ શિવગઙ્ગાયાં યથાશાસ્ત્રં યથાક્રમમ્ ।
સ્નાનં કૃત્વા પ્રયત્નેન ચકારોદ્ધુલનં તતઃ ॥ ૫૬॥

ત્રિપુણ્ડ્રધારણં કૃત્વા મન્ત્રપૂતેન ભસ્મના ।
રુદ્રાક્ષધારણં ચક્રે સર્વપાતકનાશનમ્ ॥ ૫૭॥

આગ્નીધ્રેશ્વરમાસાદ્ય પૂજાદ્રવ્યેણ સાદરમ્ ।
સમ્પૂજ્ય નત્વા વિવિધૈઃ સ્તોત્રં સ્તુત્વા સદાશિવમ્ ॥ ૫૮॥

તતસ્તદાજ્ઞયા વિષ્ણુર્વક્રતુણ્ડમુપાગતઃ ।
તત્ર સ્નાત્વા વિધાનેન વક્રતુણ્ડં વિનાયકમ્ ॥ ૫૯॥

સમ્યગારાધ્ય વિધિવત્પુનઃસાદરપૂર્વકમ્ ।
સમભ્યર્ચ્યાતિયત્નેન કાલભૈરવમાગતઃ ॥ ૬૦॥

કાલકુણ્ડે યથાશાત્રં સ્નાત્વા વિષ્ણુસ્તતઃ પરમ્ ।
ક્ષીરાજ્યમધુભિઃ સમ્યગભિષિચ્ય ચ ભૈરવમ્ ॥ ૬૧॥

દિવ્યમન્દારપુષ્પૌઘૈરુપહારૈશ્ચ શોભનૈઃ ।
પ્રસાદ્ય ભૈરવં દેવં પ્રણમ્ય ચ તદાજ્ઞયા ॥ ૬૨॥

તત્પ્રાન્તદિવ્યલિઙ્ગાનિ પૂજયામાસ સાદરમ્ ।
પાપભક્ષેશ્વરં ચૈવ સમ્પૂજ્ય તદનન્તરમ્ ॥ ૬૩॥

તતઃ સન્તોષમાશ્રિત્ય (માપન્નો) વીરેશં સમુપાગતઃ ।
તત્ર વીરેશકુણ્ડેઽપિ પુનઃ સ્નાત્વા વિશેષતઃ ॥ ૬૪॥

તતો દદર્શ વીરેશં ભક્તવત્સલમવ્યયમ્ ।
દૃષ્ટ્વા પ્રણમ્ય બહુધા પૂજાં ચક્રે સ સાદરમ્ ॥ ૬૫॥

તતસ્તદાજ્ઞાં સમ્પ્રાપ્ય યયૌ પશુપતીશ્વરમ્ ।
તત્ર પાશુપતં કુણ્ડં વિલોક્યાતિમનોહરમ્ ॥ ૬૬॥

સ્નાનં ચક્રે વિધાનેન નત્વા પશુપતીશ્વરમ્ ।
ચક્રે પૂજાં વિધાનેન પૂજાદ્રવ્યાણિ(વ્યેણ) સાદરમ્ ॥ ૬૭॥

તતસ્તદાજ્ઞયા તુષ્ટો દણ્ડપાણિમુપાગતઃ ।
દણ્ડપાણિં સમભ્યર્ચ્ય પ્રસાદ્ય તદનુજ્ઞયા ॥ ૬૮॥

જ્ઞાનવાપીં પ્રણમ્યાગ્રં સમ્પૂજ્ય ચ યથોચિતમ્ ।
સ્નાનં ચક્રે તતઃ સમ્યગ્વિધિપૂર્વકમાદરાત્ ॥ ૬૯॥

તતો જ્ઞાનેશમભ્યર્ચ્ય નત્વા પઞ્ચવિનાયકાન્ ।
ઢુણ્ઢિરાજાર્ચનં ચક્રે સ વિષ્ણુર્વિધિપૂર્વકમ્ ॥ ૭૦॥

તતઃ સ તદનુજ્ઞાતો મુક્તિમણ્ડપમાયયૌ ।
તતો નન્દીશમભ્યર્ચ્ય દ્વારપાલાનપિ ક્રમાત્ ॥ ૭૧॥

ચકાર મદનુજ્ઞાતો મમારાધનમાદરાત્ ।
આદૌ પઞ્ચામૃતૈઃ સમ્યગભિષિચ્ય યથાવિધિ ॥ ૭૨॥

કામધેનુપ્રસાદેન સમ્પ્રાપ્તૈરમલૈર્નરૈઃ(ર્ઘટૈઃ) ।
તીર્થોદકં સમાહૃત્ય સ્વયમેવ જનાર્દનઃ ॥ ૭૩॥

અભિષેકં તતશ્ચક્રે રુદ્રસૂક્તેન સાદરમ્ ।
તતઃ પરિમલૈર્દ્રવ્યૈરભિપૂજ્ય યથાવિધિ ॥ ૭૪॥

અનર્ઘ્યરત્નૈરકરોત્પૂજાં તદનુ સાદરમ્ ।
નવૈઃ સ્વોપહૃતૈઃ શુદ્ધૈર્બિલ્વપત્રૈર્મનોહરૈઃ ॥ ૭૫॥

મન્દારપુષ્પૈરમલૈરન્યૈશ્ચ કુસુમૈર્નવૈઃ ।
વિચિત્રરત્નમાલાભિઃ સુવર્ણાભરણૈરપિ ॥ ૭૬॥

ભક્ત્યા સમ્પૂજયામાસ વિષ્ણુઃ શ્રદ્ધાસમન્વિતઃ ।
તતો મનોહરૈર્દિવ્યૈર્નૈવેદ્યૈરતિશોભનૈઃ ॥ ૭૭॥

ધૂપદીપાદિભિશ્ચાપિ તોષયામાસ માં શુભમ્ ।
તતઃ પ્રદક્ષિણાદીનિ કૃત્વા નત્વા યથાવિધિ ॥ ૭૮॥

સ્તોત્રૈશ્ચ વિવિધૈઃ સ્તુત્વા ચકારાન્તર્ગૃહાદિકમ્ ।
એવં વર્ષાયુતં વિષ્ણુર્નિત્યં યાત્રાપરાયણઃ ॥ ૭૯॥

ઉપાસ્ય કાશ્યાં સન્તુષ્ટઃ શ઼ૃણ્વન્શિવકથાઃ શુભાઃ ।
શિવૈકશરણો નિત્યં સ્થિરલિઙ્ગાર્ચને રતઃ ॥ ૮૦॥

ગન્તુકામસ્તતો વિષ્ણુઃ કદાચિદિદમબ્રવીત્ ।
જ્ઞાનવાપીતટે રમ્યે તપઃ કૃત્વા યથાવિધિ ॥ ૮૧॥

ગમિષ્યે યત્ર કુત્રાપિ શિવેન પ્રેરિતસ્તતઃ ।
ત્યક્તેદાનીમિયં કાશી દુઃખં દાસ્યત્યસંશયમ્ ॥ ૮૨॥

અનન્તજન્મતપસા સમ્પ્રાપ્તા શિવરૂપિણી ।
ઇત્યુક્ત્વા તદનુ પ્રીત્યા જ્ઞાનવાપીતટે શુભે ॥ ૮૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે જ્ઞાનવાપીપ્રશંસાકથનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૬ । ૧-૮૩॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 6 . 1-83..

Notes:

Śiva શિવ describes to Pārvatī પાર્વતી about the visit paid by Viṣṇu વિષ્ણુ to Viśveśvara Jyotirliṅga વિશ્વેશ્વર જ્યોતિર્લિઙ્ગ, Jñānavāpī જ્ઞાનવાપી and Kaśī કાશી; where, He spends time in worshiping Śiva શિવ at the Viśveśvara Jyotirliṅga વિશ્વેશ્વર જ્યોતિર્લિઙ્ગ and performing austerities at Jñānavāpī જ્ઞાનવાપી.

Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

*Kashimahatmye Jnanavapiprashamsakathanam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*